वासन्तिकः २ केलिकिलः ३ विदूषकः ४ प्रहासी ५ प्रीतिदः ६ । इति हेमचन्द्रः ॥ ( यथा, नैषधे । १६ । ६४ ।
"दूरात्पदस्तिमिरजलधेर्वाडववह्निभानु-
र्भानुस्ताम्यद्दनवडवनीकेलिवैहासिकोऽयम् ॥")

वोटा, स्त्री, दासी । यथा,—
"पोटा वोटा च चेटी च दासी च कुट-
हारिका ॥"
इति हेमचन्द्रः ॥

वोड़ः, पुं, गुवाकः । इति शब्दरत्नावली ॥ जटाधरे भूरिप्रयोगे च भोड़ इति पाठः ॥

वोड्रः, पुं, गोनसमर्पः । वोड़ा इति भाषा । यथा । गोनासो मण्डली वोड्रः । इति भरतधृतविक्रमादित्यः ॥ मत्स्यविशेषः । इति मेदिनी ॥

वोड्री, स्त्री, पणचतुर्थांशः । इति मेदिनी ॥ वुड़ि इति भाषा ॥

वोढव्यः, त्रि, वहधातोस्तव्यप्रत्ययेन निष्पन्नमेतत् । वहनीयः । वाह्यः । इति मुग्धबोधव्याकरणम् ॥ ( यथा, हरिवंशे । ७५ । ८८ ।
"वोढव्या पुङ्गवेनेव धूःसदा रणमर्द्दनि ॥"
परिणेतव्यः । यथा, महाभारते ।१३।४४।४५।
"न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा ॥")

वोढा, [ ऋ ] पुं, ( वहतीति । वह+तृच् । "सहिवहोरोदवर्णस्य ।" ६ । ३ । ११२ । इति अकारस्यौकारः । ) भारिकः । ( यथा, भागवते । ५ । १० । २ ।
"विषमगतां स्वशिविकां रहूगण उपधार्य्य पुरुषानधिवहत आह हे वोढारः साध्वतिक्रामत ॥" ) मूढ़ः । परिणेता । इति शब्दरत्नावली ॥ ( यथा, मनुः । ८ । २०४ ।
"अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते ।
उभे ते एकशुल्केन वहेदित्यब्रवीन्मनुः ॥")
सूतः । इति मेदिनी ॥ अनड्वान् । ऋषभः । इति राजनिर्घण्टः ॥ ( यथा, महाभारते । ११ । २६ । ५ ।
"तपोऽर्थीयं ब्राह्मणी धत्ते गर्भं
गौर्व्वोढारं धावितारं तुरङ्गी ॥"
वहनकर्त्तरि, त्रि । यथा, कुमारे । १ । १५ ।
"भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः ॥" )

वोढुः, पुं, मुनिविशेषः । यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥"
इत्याह्निकाचारतत्त्वम् ॥

वोण्टः, पुं, वृन्तम् । इति शब्दरत्नावली ॥ वोँटा इति भाषा ॥ किन्तु लिपिकरप्रमादपाठोऽयम् । यतः मूलग्रन्थे ।
"तथा वोँट इति ख्याते वृन्तं प्रसवबन्धनम् ॥"

वोदः, त्रि, आर्द्रः । इति त्रिकाण्डशेषः ॥

वोदालः, पुं, (वोदः आर्द्रः सन् अलतीति । अल+अच् । ) मत्स्यविशेषः । वोयालि इति भाषा ॥ तत्पर्य्यायः । सहस्रदंष्ट्री २ पाठीनः ३ वदालकः ४ । इति शब्दरत्नावली ॥

वोरकः, पुं, लेखकः । इति त्रिकाण्डशेषः ॥

वोरटः, पुं, कुन्दपुष्पम् । इति त्रिकाण्डशेषः ॥

वोरपट्टी, स्त्री, मन्दुरा । इति शब्दमाला ॥ माडुर इति भाषा ॥

वोरवः, पुं, धान्यविशेषः । वोरो इति भाषा । अस्य गुणाः ।
"वोरवस्तु बुधैः प्रोक्तस्त्रिदोषस्य प्रकोपणः ।
मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः ॥"
इति राजवल्लभः ॥

वोरुखानः, पुं, पाटलवर्णाश्वः । इति हेमचन्द्रः ॥

वोलं, क्ली, ( वोलयति प्रायशो निमग्नं भवतीति । वुल+अच् । यद्वा,वा गतौ पिच्छादित्वात् ऊलच् । ) स्वनामख्यातवणिग्द्रव्यम् । तत्पर्य्यायः । रक्तापहम् २ सुखम् ३ सुरसम् ४ पिण्डकम् ५ विषम् ६ निर्लोहम् ७ वर्व्वरम् ८ पिण्डम् ९ सौरभम् १० रक्तगन्धकम् ११ रसगन्धम् १२ महागन्धम् १३ विश्वम् १४ शुभगन्धम् १५ विश्वगन्धम् १६ गन्धरसम् १७ प्रवारिः १८ । अस्य गुणाः ।
"वोलश्च कटु तिक्तोष्णं कषायं रक्तदोषनुत् ।
कफपित्तामयान् हन्ति प्रदरादिरुजापहम् ॥"
इति राजनिर्घण्टः ॥
तत्पर्य्यायगुणाः ।
"वोलं गन्धरसः प्राणपिण्डगोपरसाः समाः ।
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ॥
मधुरं कटु तिक्तञ्च दाहं स्वेदत्रिदोषजित् ।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धकृत् ॥"
इति भावप्रकाशः ॥

वोलः, पुं, ( वातीति । वा+ऊलच् । ) रसगन्धः । इत्यमरः ॥

वोलकः, पुं, लेखकः । इति शब्दरत्नावली ॥

वोल्लाहः, पुं, अश्वविशेषः । यथा,—
"वोल्लाहस्त्वयमेव स्यात् पाण्डुकेशरवालधिः ।"
इति हेमचन्द्रः ॥

वोहित्थं, क्ली, यानपात्रम् । इति हेमचन्द्रः ॥ जाहाज इति भाषा ॥

वौ(बौ)द्धं, क्ली, (बुद्धेन कृतम् । बुद्ध+अण् । ) बुद्धकृतनिरीश्वरशास्त्रम् । तत् सर्व्वैः शास्त्रकारैः खण्डितं अतएवाग्राह्यम् । जिनधर्म्मः । यथा,
"ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम् ।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा ॥
गत्वाथ मोहयामास राजपुत्रान् बृहस्पतिः ।
जिनधर्म्मं समास्थाय वेदवाह्यं स वेदवित् ॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः ।
वेदवाह्यान् परिज्ञाय हेतुवादसमन्वितान् ।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान् ॥"
इति मात्स्ये सोमवंशानुकीर्त्तनं नाम २४ अः ॥
बुद्धसम्बन्धिनि, त्रि ॥

वौषट्, अ, (उह्यतेऽनेन हविरिति । वह+बाहुलकात् डौषट् । ) देवहविर्दानमन्त्रः । तत्पर्य्यायः । स्वाहा २ श्रौषट् ३ वषट् ४ स्वधा ५ । इत्यमरः ॥ एते पञ्च शब्दा देवहविर्दाने वह्निमुखाहुतौ वर्त्तन्ते । देवाय हविषो दानं देवहविर्दानम् । तत्र देवा इन्द्रादयः अत्र पितरो देवता इति स्मृतेस्तेऽपि देवा हविर्दानं इत्यनेन एते मन्त्रा इति सूचितम् । अमरत्ते स्वाहयेव हविर्भुजमिति रघुः । स्वाहाऽयं मन्त्रभेदे स्त्रियां स्वाहाग्नियोषितीति कोषान्तरम् । स्वाहा दन्त्यादि । श्रौषट् तालव्यादि मूर्द्धन्यमध्यम् । वौषट् वषट्द्वयं मूर्द्धन्यमध्यम् । स्वधा दन्त्यादि । इन्द्राय स्वाहा । इत्यादिप्रयोगः । इति भरतः ॥

व्यंशकः, पुं, ( विगतोऽंशो विभागो यस्य । छेदादिना प्रायो विभागानर्हत्वादस्य तथात्वम् । ) पर्व्वतः । इति त्रिकाण्डशेषः ॥

व्यंसकः, पुं, (वि+अंस+ण्वुल् । ) धूर्त्तः । इति हेमचन्द्रः ॥

व्यंसितः, त्रि, ( वि+अंस+क्तः । ) प्रतारितः । इति त्रिकाण्डशेषः ॥

व्यक्तः, त्रि, ( वि+अञ्ज व्यक्तौ+क्तः । ) प्राज्ञः । इत्यमरः ॥ स्फुटः । इति मेदिनी ॥ ( यथा, साहित्यदर्पणे । ३ । १ ।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥")
पुं, विष्णुः । यथा,—
"व्यक्तो वायुरधोक्षजः ।"
इति तस्य सहस्रनामस्तोत्रम् ॥

व्यक्तदृष्टार्थः, पुं, ( व्यक्तं स्फुटं यथा स्यात् तथा दृष्टोऽर्थो येन । ) साक्षी । तत्पर्य्यायः । प्रत्यक्षी २ । इति त्रिकाण्डशेषः ॥

व्यक्तरूपः, पुं, (व्यक्तं रूपं यस्य । ) विष्णुः । यथा,
"अहश्चो व्यक्तरूपश्च सहस्रजिदनन्तजित् ।"
इति तस्य सहस्रनामस्तोत्रम् ॥
स्पष्टरूपयुक्ते, त्रि ॥

व्यक्तिः, स्त्री, ( व्यज्यतेऽनयेति । वि+अञ्ज+क्तिन् । ) पृथगात्मिका । इत्यमरः ॥ जनः । इति हेमचन्द्रः ॥ स्फुटता च । ( यथा, रघुः ।१।१०।
"तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि
वा ॥"
भूतमात्रम् । यथा, गीतायाम् । ८ । १८ ।
"अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे ॥"
"व्यक्तयश्चराचराणि भूतानि ।" इति तट्टीकायां स्वामी ॥ न्यायशास्त्रोक्तपदार्थः । यथा, साहित्यदर्पणे । २ । २५ ।
"सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥")

व्यग्रः, त्रि, ( विरुद्धं अगतीति । अग+ऋज्रेन्द्रेति साधुः । ) आसक्तः । ( यथा, महानिर्व्वाणतन्त्रे । ३ । १२४ ।
"लुब्धा धनार्जने व्यग्राः सदा चञ्चलमानसाः ॥")
आकुलः । इत्यमरः ॥ ( यथा, कुमारे ।७।२।
"वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ॥"